॥ श्रीः ॥

हितोपदेश-मित्रलाभः

किरणावली-संस्कृत-हिन्दीव्याख्योपेतः



मङ्गलाचरणम्

सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः ।
जाह्नवीफेनलेखेव यन्मूर्ध्नि शशिनः कला ॥ १ ।

तर्कश्रुतिभिरावेद्यमक्षरात् परतः परम् ।
परं ब्रह्म नमस्कृत्य 'स्वामिनारायणं' प्रभुम् ॥
'श्रीकृष्णवल्लभाचार्यः' करोति 'किरणावलीम्' ।
व्याख्यां शिशुहितां रम्यां 'मित्रलाभ'नयानुगाम् ॥

अन्वयः—यन्मूर्ध्नि शशिनः कला जाह्नवीफेनलेखा इव (अस्ति), तस्य धूर्जटेः प्रसादात् सतां साध्ये सिद्धिः अस्तु ॥ व्याख्या—यस्य मूर्धा यन्मूर्धा, तस्मिन् । यस्य = शङ्करस्य मूर्ध्नि = ललाटे । शशिनः—शशः अङ्करूपोऽस्ति अस्येति शशी, तस्य—शशिनः = चन्द्रस्येत्यर्थः । कला = षोडशो भागः, 'कला तु षोडशो भाग' इत्यमरः । जाह्नवीफेनलेखेव = जह्नोः अपत्यं कन्या जाह्नवी = गङ्गेत्यर्थः । जाह्नव्याः फेनः = डिण्डीरः, 'डिण्डीरोऽब्धिकफः फेनः' इत्यमरः, जाह्नवीफेनस्य लेखा=चिह्नमिव, विराजते-इति शेषः । तस्य धूर्जटेः-धूः=भारभूता जटिः=जटा यस्य सः तस्य= शङ्करस्य, प्रसादात् = अनुग्रहात् । सतां=सज्जनानां विद्यार्थिनाम् , साध्ये = साधितुं योग्ये स्वाभिलषिते एतद्ग्रन्थाऽध्ययनात्मके कार्ये, सिद्धिरस्तु=पारगामित्वं भवतु ।

भाषान्तरम्—जिन शङ्करजी के ललाटमें चन्द्रकी एक कला गङ्गाजी के फेन (गाज) की रेखा के समान सुशोभित है, उन शङ्करजीकी प्रसन्नतासे सब सत्पुरुषों के कार्यों की निर्विघ्न सिद्धि हो ॥ १ ॥

ग्रन्थस्योपादेयतां दर्शयति—

श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु ।
वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥ २ ॥

अ०—श्रुतः अयं हितोपदेशः संस्कृतोक्तिषु पाटवम्, सर्वत्र वाचां वैचित्र्यम्, नीतिविद्यां च ददाति ॥ व्या०—श्रुतः = अधीतः,—गुरुमुखात् श्रावणप्रत्यक्षविषयीकृत इति यावत्, अयम्—एष बुद्धिस्थः, हितोपदेशः—हितः = हितकरः उपदेशो यस्मात्, तादृशः 'हितोपदेश'नामा ग्रन्थः (इदं कर्तृपदम्), संस्कृतोक्तिषु—संस्कृतस्य = संस्कृतभाषायाः, उक्तयः = भाषणानि तासु—इत्यर्थः। पाटवम् = पटोर्भावः पाटवम् = चतुरताम् (ददाति), सर्वत्र = यावति शब्दप्रयोगात्मके व्यवहारे, वाचाम् = गिराम् 'गीर्वाग् वाणी सरस्वती' इत्यमरः। वैचित्र्यम् = नवनवार्थशालित्वम् (ददाति), नीतिविद्यां च = नीयते लभ्यते स्वेप्सितम् अनया इति नीतिः=सामदानभेददण्डेत्युपायचतुष्टयप्रयोगः, विद्या=वेदनं ज्ञानम्, नीत्याः विद्या नीतिविद्या=नीतिशास्त्रज्ञानं ताम्, सामदानादिप्रयोगज्ञानं ददातीत्यर्थः ॥

भा०—इस हितोपदेशका अध्ययन करनेसे संस्कृत भाषामें व्युत्पत्ति, सभी प्रकारके शब्दप्रयोगात्मक व्यवहारों में निपुणता तथा नीति का ज्ञान प्राप्त होता है ॥ २ ॥

विद्याप्रशंसा

अजराऽमरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ ३ ॥

अ०—प्राज्ञः अजराऽमरवत् विद्याम् अर्थं च चिन्तयेत्। मृत्युना केशेषु गृहीत इव धर्ममाचरेत् ॥ व्या०—प्रकर्षेण जानातीति प्रज्ञः, प्रज्ञ एव इति प्राज्ञः, स्वार्थे अण्, धीमान् मनुष्य इत्यर्थः। न विद्यते जरा यस्य सः, अथवा न जीर्यते इत्यजरः, न म्रियते इत्यमरः, अजरश्चासौ अमरश्चेति अजराऽमरः, स इव=तेन तुल्यम्=इत्यजराऽमरवत् = जरामरणरहित इवेत्यर्थः। विद्याम् = शास्त्रज्ञानकलाज्ञानादिकम्, अर्थं च = द्रव्यं च, चिन्तयेत्-उपार्जयेत्। मृत्युना = अन्तकेन, केशेषु = शिरोरुहेषु, गृहीत इव = धृत इव धर्मं = पुण्यम्। आचरेत् = अनुतिष्ठेत् ॥

भा०—बुद्धिमान् मनुष्य अपने को अजर-अमर समझ कर विद्या तथा द्रव्य (धन) का उपार्जन करे और मृत्यु हमको ले जाने के लिये हमारे शिर के केश (चोटी) पकड़े हुए है, ऐसा समझ कर सदा धर्माचरण करे ॥ ३ ॥

सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।
अहार्यत्वादनर्घत्वादक्षयत्वाच्च सर्वदा ॥ ४ ॥

अ०—(तत्त्वज्ञाः) सर्वदा अहार्यत्वात् अनर्घत्वात् अक्षयत्वाच्च सर्वद्रव्येषु विद्यैव अनुत्तमं द्रव्यम् अस्तीति आहुः ॥ व्या०—(तत्त्ववेत्तारः सत्याऽसत्यविवेचकाः) सर्वदा = सर्वकालम्, अहार्यत्वात् = हर्तुं योग्या हार्या, हार्या न भवतीति अहार्या, तस्या भावः = अहार्यत्वम्, तस्मात् अहार्यत्वात् = चौरादिभिरपहर्तुम् अयोग्यत्वादित्यर्थः। अनर्घत्वात्=नास्ति अर्घो मूल्यं यस्याः सा अनर्घा=अमूल्या, तस्या भावः अनर्घत्वम्, तस्मात्, अनर्घत्वात्, द्रव्यादिमूल्येनाऽपि प्राप्तुमशक्यत्वादित्यर्थः। अक्षयत्वात् = नास्ति क्षयः = नाशः स्थूलपदार्थवत् क्लेदनदहनपरिणामाद्यात्मकः शीघ्रं विनाशो यस्याः सा इति अक्षया, तस्या भावस्तस्मात्। व्यये कृते वृद्धिशीलत्वादिति यावत्। सर्वद्रव्येषु = सर्वाणि च तानि द्रव्याणि च सर्वद्रव्याणि=सुवर्णरजताद्यात्मकानि रत्नाद्यात्मकानि अन्यानि च यानि क्रयविक्रयार्हवस्तूनि, तेषु मध्ये विद्या एव, अनुत्तमम् = उत्कृष्टं पराकाष्ठां गतम्, द्रव्यम् (अस्तीति) आहुः=वदन्तीति। अत्र श्लोके-अनुमानत्रयम् = हेतुत्रयेण बोध्यम्।

भा०—विद्वान् लोग सब धनों में से विद्या को ही उत्तम धन कहते हैं, क्योंकि चोर लोग उसकी चोरी नहीं कर सकते हैं, और मूल्य देने पर भी वह खरीदी नहीं जा सकती है, और दूसरे को देने (पढ़ाने) से कमती नहीं होती है, किन्तु बढ़ती ही रहती है, इसलिये श्रेष्ठ है ॥ ४ ॥

संयोजयति विद्यैव, नीचगाऽपि नरं सरित् ।
समुद्रमिव दुर्धर्षं नृपं भाग्यमतः परम् ॥ ५ ॥

अ०—नीचगा अपि सरित् दुर्धर्षं समुद्रमिव (नीचगाऽपि) विद्या एव नरं नृपं संयोजयति, अतः (विद्या) परम् भाग्यं (उद्घाटयति)। व्या०—नीचगाऽपि = निम्नप्रदेशगामिन्यपि, सरित्=नदी, (तृणकाष्ठादिकम्) दुर्धर्षम् = दुःखेन धृष्यते आक्रम्यते इति दुर्धर्षः तम्, दुरतिक्रमम् दुष्प्रापमिति यावत्, समुद्रम्-मुद्राभिः=रत्नैः सहितः समुद्रः, तम्=अर्णवम्, इव=यथा (संयोजयति) तथा (नीचगाऽपि) नीचं कुलस्वभावादिनाऽपकृष्टमपि पुरुषं गच्छतीति नीचगा, नीचैरधीता सत्यपीत्यर्थः नरं=जातिकुलाद्यपकृष्टं जनम्, विद्या एव दुर्धर्षं=दुष्प्रापम्, नृपम् = नॄन् पातीति नृपः, लोकरक्षको राजा, तम्, संयोजयति=सङ्गमयतीत्यर्थः, प्रापयतीति यावत् अतः परम्=इत ऊर्ध्वं, भाग्यम्=दैवाधीनम् फलम्।

भा०—जैसे नीचे प्रदेश में बहने वाली नदी तुच्छ तृणकाष्ठादिकको दुष्प्राप्य अथाह समुद्र में जा मिलाती है वैसे ही नीच पुरुषको प्राप्त होकर विद्या ही उस पुरुष को बड़े भारी राजा से मिलाती है। उसके बाद वह भाग्यानुसार फल पाता है ॥ ५ ॥

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥ ६ ॥

अ०—विद्या विनयं ददाति, विनयात् पात्रतां याति, पात्रत्वात् धनम् आप्नोति, धनात् धर्मं (करोति), ततः सुखम् (आप्नोति)। व्या०—विद्या विनयं=नम्रताम्, ददाति (जनायेति शेषः), विद्यायुक्तः नम्रो भवतीति भावः। विनयात्=नम्रत्वात् (हेत्वर्थे पञ्चमी, एवमग्रेऽपि) पात्रतां = सत्पात्रत्वम्, याति = प्राप्नोति,

(विनयवान् जन इति शेषः) पात्रत्वात् = सत्पात्रत्वात्, दानादिसमर्पणयोग्यत्वात् विश्वासपात्रत्वाद्वा, धनम्=सुवर्णरजताद्यात्मकम् अर्थम् आप्नोति, विश्वासकार्ये नियुक्तः सन् कार्यपरिसमाप्त्या प्रसादितात् स्वामिनः विपुलं धनं लभते इति भावः। धनात्=नीतिसम्पादितात् धनात्, धर्मम् = यागदानादिद्वारा पुण्यम्, अर्जयति–इति शेषः। ततः = तस्मात् पुण्यात्, सुखम् = स्त्री–पुत्र–समृद्धि–प्रतिष्ठाऽऽरोग्यादिभिः सर्वदा आनन्दम्, अनुभवतीति शेषः।

भा०—मनुष्य विद्या को पढ़ने से विनयवान् बनता है, विनयवान् होने से ही वह सुपात्र कहाता है, सुपात्र होने से वह धन को प्राप्त करता है, धन से धर्मकार्य–यज्ञदानादि करके पुण्यशाली बनता है, पुण्यशाली होने से सांसारिक स्त्री, पुत्र, समृद्धि, लोकप्रतिष्ठा आदि से सदा सुखी रहता है ॥ ६ ॥

विद्या शस्त्रञ्च शास्त्रञ्च द्वे विद्ये प्रतिपत्तये।
आद्या हास्याय वृद्धत्वे द्वितीयाऽऽद्रियते सदा ॥ ७ ॥

अ०—शस्त्रञ्च शास्त्रञ्च विद्या (भवति); द्वे विद्ये प्रतिपत्तये (भवतः) आद्या वृद्धत्वे हास्याय (भवति); (अतः) द्वितीया सदा आद्रियते। व्या०—शस्त्रम् = खड्गादिकं परेभ्यः स्वरक्षणसाधनम्; शास्त्रम् = विधिनिषेधादिना लोकशासनाय आप्तविरचितवाक्यसमूहश्चेति द्वयं विद्या भवति; कारणे कार्योपचारात् विद्यासाधनयोरपि द्वयोर्विद्याप्रयोगः। एते द्वे विद्ये प्रतिपत्तये = स्वेष्टकार्यसिद्धये, भवतः। तयोर्मध्ये या आद्या = शस्त्रात्मिका विद्या, सा तु वृद्धत्वे = वार्धक्ये सति, दुर्बलावस्थायां सामर्थ्याऽपगमे सतीति भावः, हास्याय = उपहासाय भवति, अत एव द्वितीया (या) = शास्त्रविद्या सा तु सदा = सर्वदा, बाल्ये यौवने प्रौढे वार्धक्येऽपि चेत्यर्थः। आद्रियते = लोकैः प्रशस्यते–आदृता भवतीति भावः। (अत्र श्लोके–'विद्या शस्त्रस्य शास्त्रस्येति' पाठान्तरम्)।

भा०—संसार में दो विद्यायें प्रसिद्ध हैं, एक शस्त्रविद्या और दूसरी शास्त्रविद्या; उन दोनों को पढ़ने से मनुष्यको इष्टसिद्धि होती है, किन्तु निर्बल (वृद्धादि) अवस्था में शस्त्रविद्या से अपना रक्षण तथा विजयादि नहीं कर सकते हैं, इसलिये शस्त्रविद्या हँसी कराती है, शास्त्रविद्या तो सबल–निर्बल सभी अवस्थाओं में सुख देनेवाली है, इसलिये द्वितीय विद्या–शास्त्र विद्या ही प्रशंसित है ॥ ७ ॥

यन्नवे भाजने लग्नः संस्कारो नाऽन्यथा भवेत्।
कथाच्छलेन बालानां नीतिस्तदिह कथ्यते ॥ ८ ॥

अ०—यत् नवे भाजने लग्नः संस्कारः अन्यथा न भवेत्; तत् इह कथाच्छलेन बालानां नीतिः कथ्यते। व्या०—यत्=यस्माद्धेतोः, (यथा) नवे = नूतने = अपक्वे, भाजने = मृत्पात्रादौ, लग्नः = अङ्कितः, संस्कारः = रेखादिचिह्नम्, अन्यथा = अन्यप्रकारो विलीनो वा न भवेत् (तथा) यत् = यस्माद्धेतोः, नवे = नूतने विद्यासंस्काररहिते, भाजने = विद्यापात्ररूपे बालान्तःकरणे, लग्नः=सङ्क्रान्तः, संस्कारः = विद्यासंस्कारः, अन्यथा = विपरीतो न भवेत्। तत्=तस्माद्धेतोः, इह = अस्मिन् ग्रन्थे, कथाच्छलेन—कथा = काककूर्मादीनां कल्पितोपाख्यानम्, तदेव छलं तेन, बालानाम् = प्रथमं संस्कृतभाषायां प्रवेशाऽभिलाषुकाणाम् (बोधार्थमिति शेषः) कथ्यते = उपदिश्यते। मया विष्णुशर्म्मणेति शेषः।

भा०—बालकों का हृदय मृत्तिका के नये घट के समान निर्मल होता है, इसलिये नये घटादि में खींचे हुए रेखा आदि के चिह्न—बरतन फूटने तक नहीं जाते, वैसे ही बालकों के निर्मल अन्तःकरणों में उपदेश द्वारा किये गये शुभ संस्कार भी जीवन पर्यन्त दूर नहीं होते, इसलिये मैं (विष्णुशर्मा) बालकों को मनोरञ्जक नीतियुक्त कथाएँ कहकर उपदेश देने का प्रयत्न करता हूँ ॥ ८ ॥

मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च।
पञ्चतन्त्रात् तथाऽन्यस्माद् ग्रन्थादाकृष्य लिख्यते ॥ ९ ॥

अ०—(मया) पञ्चतन्त्रात् तथा अन्यस्मात् ग्रन्थात् आकृष्य मित्रलाभः, सुहृद्भेदः, विग्रहः, सन्धिः, एव च लिख्यते। व्या०—मया (विष्णुशर्मणा) पञ्चतन्त्रात् = 'पञ्चतन्त्र'नामकग्रन्थात्, तथा अन्यस्मात् ग्रन्थात् = महाभारत-कामन्दकीयादेः नीतिशास्त्रान्तरात्, आकृष्य = समाहृत्य सङ्गृह्य च, मित्रलाभः = मित्रस्य लाभः प्राप्तिः, सुहृद्भेदः = सुहृदो भेदः = वैमत्यम्, विग्रहः = युद्धम्, सन्धिः = मेलनं चेति लिख्यते एवेति।

भा०—मैं नीति के प्रतिपादक पञ्चतन्त्र तथा महाभारतादि ग्रन्थों से बालकों का हित करने वाली कथायें एकत्रित करके मित्रलाभ, सुहृद्भेद, विग्रह, सन्धि, इन चार प्रकरणों में पर्यवसित ऐसा यह 'हितोपदेश' नाम का ग्रन्थ लिखता हूँ ॥ ९ ॥

अथ कथामुखम्

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम्। तत्र सर्वस्वामिगुणोपेतः सुदर्शनो नाम नरपतिरासीत्। स भूपतिरेकदा केनाऽपि पाठ्यमानं श्लोकद्वयं शुश्राव।

व्या०—भागीरथीतीरे = 'भगीरथ'नाम्ना राजकुमारेण आनीता या गङ्गा सा भागीरथी, तस्याः तीरे तटे, पाटलिपुत्रनामधेयम् = नाम एव इति नामधेयम्, 'पाटलिपुत्र' इति (पटना) नामधेयं यस्य तत् 'पाटलिपुत्र'नामकं, नगरं = पुरम् अस्ति = वर्तते। तत्र = तस्मिन्निति तत्र=पाटलिपुत्रनगरे, सर्वस्वामिगुणोपेतः=सर्वम् ऐश्वर्यं प्रजेशनशीलत्वरूपम् अस्ति अस्य इति स्वामी = राजा, स्वामिनो गुणाः =

शौर्यादयः, सर्वे च ते स्वामिगुणाः सर्वस्वामिगुणाः तैः उपेतः=युक्तः, सुदर्शनो नाम=सुष्ठु सुखकरं दर्शनं यस्य सः सुदर्शनः, 'सुदर्शन'नामा, नरपतिः=पाति रक्षतीति पतिः, नराणां पतिः नरपतिः=राजा, आसीत्=बभूव। स भूपतिः=असौ 'सुदर्शन'नामा भूपतिः, भुवः पतिः भूपतिरिति विग्रहः। एकदा=एकस्मिन् काले, केनाऽपि=व्यक्तिविशेषेण विदुषा, पठ्यमानम्=पठ्यते तत् पठ्यमानम् श्लोकयोः द्वयम्-श्लोकद्वयम् 'अनेके'-त्यादिरूपं वक्ष्यमाणं पद्यद्वयम्, शुश्राव=आकर्णितवान्।

भा०—श्रीभागीरथी गङ्गाके तीर पर'पाटलिपुत्र' (पटना) नाम का एक नगर है, उस नगर का राजा 'सुदर्शन' नाम का था, वह राजाओं के सब गुणों से युक्त था, उस राजाने एक समय किसी द्वारा पढ़े जाते हुए इन दो श्लोकों को सुना (जो आगे कहे जा रहे हैं।)

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥ १०॥

व्या०—सर्वस्य=निखिलजनस्य, अनेकसंशयोच्छेदि, न एके=अनेके, अनेके च ते संशयाः अनेकसंशयाः। अनेकसंशयानाम् उच्छेदि, इत्यनेकसंशयोच्छेदि=बहुविधधार्मिक-राजनीतिक-सामाजिकैतिहासिक-संशयनिरासकमित्यर्थः। परोक्षार्थस्य=अक्षाणाम्—इन्द्रियाणां परः इति परोक्षः परोक्षश्चासौ अर्थश्चेति परोक्षार्थः तस्य परोक्षार्थस्य=भूतभविष्यत्सूक्ष्मपदार्थस्येत्यर्थः। दर्शकम्=प्रत्यक्षमिव यथार्थज्ञानजनकम्, शास्त्रम् (एव) द्वितीयं दिव्यं लोचनं=नेत्रं भवतीति हेतोः यस्य जनस्य तत् दिव्यलोचनात्मकं शास्त्रम् नास्ति, सः अन्ध एव।

भा०—सब मनुष्यों को स्थूल दोनों नेत्रों से अलग दिव्य नेत्र शास्त्र ही होता है, क्योंकि शास्त्र से ही धार्मिक, राजनीतिक, सामाजिक, ऐतिहासिक संशय दूर होते हैं, भविष्य में होने वाले हानि-लाभ भी शास्त्र से ही विदित होते हैं, इसलिये ऐसा शास्त्र जिसने नहीं पढ़ा वह अन्ध के समान है॥ १०॥

यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥ ११॥

अ०—यौवनं, धनसम्पत्तिः, प्रभुत्वम्, अविवेकिता—(एतन्मध्ये) एकैकमप्यनर्थाय (भवति) (तर्हि) यत्र चतुष्टयं तत्र किमु॥

व्या०—यूनो भावो यौवनम्=यौवनावस्था, धनसम्पत्तिः=धनस्य सम्पत्तिः-धनविभव इत्यर्थः। प्रभुत्वम्=प्रभवति नियमनाय जनानां यः स प्रभुः, प्रभोर्भावः प्रभुत्वम्, स्वामित्वम् आधिपत्यं नियामकत्वमिति यावत्, अविवेकिता, विवेकस्य भावः विवेकिता न विवेकितेति अविवेकिता-विवेकशून्यता अज्ञानतेति यावत्। एतेषां चतुर्णां मध्ये एकैकम्=प्रत्येकमपि, अनर्थाय=अर्थः=पुरुषार्थो न भवतीति अनर्थः

शास्त्रनिषिद्धम् आपत्तिप्रदं कर्म इत्यर्थः, तस्मै भवति=एकैकमप्यनर्थं जनयतीति भावः। तर्हि यत्र=यस्मिन् पुरुषे, चतुष्टयम्-यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता चेति चतुष्टयमपि एकत्रितं भवति, तत्र=पुरुषे, किमु=किं वक्तव्यम्, यतः स तु अनर्थानां खनि(कोश)रूप एव भवतीति भावः।

भा०—जवानी, धनदौलत, आधिपत्य (अधिकार) और अज्ञानता (विवेकशून्यता) इन चारों में से एक-एक भी बड़ा-बड़ा अनर्थ (अत्याचार) कराता है; तो चारों जहां एकत्रित हों वहां कौन अनर्थ नहीं होगा। अर्थात् सभी अनर्थ होंगे (महाराज सुदर्शन के पुत्रों में ये चारों उपस्थित थे)॥ ११॥

इत्याकर्ण्याऽऽत्मनः पुत्राणामनधिगतशास्त्राणां नित्यमुन्मार्गगामिनां शास्त्राऽननुष्ठानेनोद्विग्नमनाः स राजा चिन्तयामास।

व्या०-इति=एतत् श्लोकद्वयम् आकर्ण्य=श्रुत्वा, आत्मनः=स्वस्य, अनधिगतशास्त्राणाम्=अधिगतं शास्त्रं यैस्ते अधिगतशास्त्राः, अधिगतशास्त्राः न भवन्ति ते अनधिगतशास्त्राः, तेषाम्=शास्त्रज्ञानशून्यानामित्यर्थः। अत एव नित्यम्=सर्वदा उन्मार्गगामिनाम्=कुत्सितो मार्गः उन्मार्गः उन्मार्गेण गच्छन्तीति उन्मार्गगामिनः तेषाम्=कुपथप्रवृत्तानां द्यूतक्रीडादिव्यसनाऽऽसक्तानामित्यर्थः। पुत्राणां=स्वतनयानाम्, शास्त्राऽनुष्ठानेन=अनुष्ठीयते तत् अनुष्ठानम् अभ्यासः, अनुष्ठानं न भवतीत्यननुष्ठानम्, शास्त्राऽनभ्यासः, (अर्थात्) शास्त्रविरुद्धाचरणम् इति यावत्, तेन हेतुना उद्विग्नमनाः=उद्विग्नं व्याकुलितं मनः=मानसं यस्य सः, चिन्ताऽऽकुलितः सञ्जिस्यर्थः, तादृशः स राजा 'सुदर्शन'नृपतिः, चिन्तयामास=शुशोच।

भा०—इन दोनों श्लोकों को सुनकर विद्याध्ययन नहीं करनेवाले तथा सर्वदा शास्त्रनिषिद्ध व्यसनों में चलने वाले अपने राजकुमारोंके शास्त्र-विरुद्धाऽऽचरण से दुःखित 'सुदर्शन' महाराज चिन्ता करने लगे।

चिन्तां निरूपयति='कोऽर्थ' इत्यादिना 'पुस्तकेषु चे'ति (३९) पर्यन्तेन—

कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्मिकः।
काणेन चक्षुषा किं वा चक्षुः पीडैव केवलम्॥ १२॥

अ०—यः न विद्वान् (भवति), न धार्मिकः (भवति), (तेन) जातेन पुत्रेण कः अर्थः (भवति)? (यथा) काणेन चक्षुषा किंवा (भवति), चक्षुः केवलं पीडा एव (भवति)। व्या०—यः पुत्रः न विद्वान्=वेत्तीति विद्वान्, पण्डितः, विविधशास्त्रकलाविज्ञानी न भवति इति यावत्। न धार्मिकः=न धर्मानुशीलनरतः(भवति), (तेन) अविदुषा अधार्मिकेण पुत्रेण='पुं'नामकनरकात् त्रायते इति पुत्रः, तेन। जातेन=स्वस्माद्युत्पन्नेनापि, कः अर्थः=धर्मार्थकाममोक्षाख्येषु कः पुरुषार्थः (भवति) सिद्धयति? न कोऽपीत्यर्थः। स्वसम्बन्धिजनपुत्रैः वर्तमानैरपि तदपेक्षया साक्षात्

स्वतनयेनाऽर्पितं जलाञ्जल्यादिकं पितरस्तावदाप्नुवन्ति, अधमा अपि पितरः स्वतनयकृतमहायज्ञादिना उद्धारं (मोक्षं) गच्छन्ति, अधार्मिकेण पुत्रेण तु धर्मादिकः कोऽपि पुरुषार्थो न सिद्ध्यति । अत एवोक्तं 'पापिनां नोपतिष्ठन्ति स्नानं दानं जलाञ्जलिः' इति भावः । यथा (दृष्टान्तः) काणेन = नेत्ररत्नविहीनेन कूपाऽवशेषेणेत्यर्थः, चक्षुषा = नेत्रगोलकेन, किं वा ? = किं दर्शनादिकं फलं भवति ? न किमपि फलं भवतीत्यर्थः, अतः तादृशं चक्षुः केवलं पीडैव = पीडाकरमेवेत्यर्थः ।

भा०—जिस पुत्र में विद्या और धन नहीं है, वैसा पुत्र दीर्घायु होने पर भी धर्म, अर्थ, काम, मोक्ष, इन चारों पुरुषार्थों में से किसी पुरुषार्थ को सिद्ध नहीं कर सकता, इसलिये उसका जन्म निष्फल है । जैसे कि—नेत्ररत्नहीन और रोगयुक्त आंखसे प्रत्यक्ष देखना आदि कोई भी काम नहीं होता । इसलिए वह निरर्थक है और दुखदायी है ॥ १२ ॥

मृतपुत्रादपि मूर्खतनयस्य शोकप्रदत्वमाह—

अजातमृतमूर्खाणां वरमाद्यौ न चाऽन्तिमः ।
सकृद्दुःखकरावाद्यावन्तिमस्तु पदे पदे ॥ १३ ॥

अ०— अजातमृतमूर्खाणाम् आद्यौ वरम्; अन्तिमः न च वरम्; आद्यौ सकृद्दुःखकरौ; अन्तिमस्तु पदे पदे (दुःखदो भवतीति शेषः) । व्या०—न जातः अजातः अजातश्च मृतश्च मूर्खश्च अजातमृतमूर्खाः तेषाम्; अजातः=अनुत्पन्नः बीजभावाऽनापन्नः, मृतः=उत्पद्य निधनं गतः; मूर्खः=विद्याशून्यः; तेषां मध्ये आद्यौ-प्रथमोपस्थितौ अजातमृतौ पुत्रौ, वरञ्च = श्रेष्ठौ—तृतीयापेक्षया ईषत् प्रियौ भवतः । अन्तिमः = मूर्खस्तु न वरमिति; यतः = तेषामाद्यौ = अजातमृतौ; द्वौ सकृत् = एकवारं दुःखकरौ = क्लेशप्रदौ भवतः, अन्तिमः = मूर्खस्तु पदे पदे = प्रतिपदम्, क्षणे क्षणे, निरन्तरमिति यावत्; दुःखदो भवतीति ।

भा०—'पुत्र का उत्पन्न नहीं होना' अथवा 'उत्पन्न होकर मर जाना' या 'जीवन-पर्यन्त मूर्ख रहना'—इन तीनों प्रकार के पुत्रों में से—'उत्पन्न नहीं होना' या 'उत्पन्न होकर मर जाना' ये दोनों अच्छे हैं; किन्तु तीसरा-'जीवनपर्यन्त मूर्ख पुत्र' अच्छा नहीं है । क्योंकि अनुत्पन्न पुत्र का बीजभाव के व्यर्थ होने पर ही क्षणमात्र दुःख होता है । मृत पुत्र के मरण समय में दुःख होता है, परन्तु दीर्घजीवी मूर्खपुत्र से तो क्षण-क्षणमें दुःख होता है ॥ १३ ॥

किञ्च—वरं गर्भस्रावो, वरमपि च नैवाऽभिगमनं
वरं जातः प्रेतो वरमपि च कन्याऽवजनिता ।
वरं वन्ध्या भार्या, वरमपि च गर्भेषु वसति-
र्न वाऽविद्वान् रूपद्रविणगणयुक्तोऽपि तनयः ॥ १४ ॥

अ०—गर्भस्रावः वरम्, न एव अभिगमनम् अपि च वरम्; जातः प्रेतः वरम्; अवजनिता कन्या अपि च वरम्; वन्ध्या भार्या वरम्; गर्भेषु वसतिः अपि च वरम्; (किन्तु) रूपद्रविणगणयुक्तः अपि अविद्वान् तनयः न वा वरम् ।

व्या०-(प्रक्षिप्तोऽयं श्लोकः) गर्भस्रावः=गर्भस्य स्रावः गर्भस्रावः=गर्भपात इत्यर्थः । वरम् = ईषत् प्रियम् । न एव अभिगमनम्=ऋतुमत्या पत्न्या सह सम्भोगाकरणम् अपि च वरम् = श्रेष्ठम् । जातः=उत्पन्नोऽपि प्रेतः = मृतः पुत्रश्च वरम्; अवजनिता=उत्पादिता कन्या अपि च वरम्; वन्ध्या=अप्रसूतसन्ताना भार्या अपि वरम्; गर्भेषु=कुक्षिषु वसतिः=स्थितिः अपि च वरम्; पुत्रस्य अप्रसव एव वरमिति भावः । किन्तु रूपद्रविणगणयुक्तः=रूपं च द्रविणञ्च रूपद्रविणे; रूपद्रविणयोः गणः तेन युक्तः=सौन्दर्ययुक्तः धनराशिसम्पन्नश्चेत्यर्थः । अपि = निश्चयेन । अविद्वान्—विद्याशून्यः; मूर्ख इति यावत् । तनयः पुत्रः न वरम् । शिखरिणीवृत्तम् ॥

भा०—जो पुत्र रूपयौवनधनादि से युक्त होने पर भी अगर विद्याशून्य हो-वह अच्छा नहीं, उससे तो गर्भ ही गिर जाना अच्छा है, अथवा ऋतुकाल में स्त्री का भोग न करना ही अच्छा है; अथवा मूर्ख पुत्र का पैदा होते ही मर जाना अच्छा है; अथवा कन्या उत्पन्न होना अच्छा है (पर मूर्ख पुत्र रहना अच्छा नहीं है) ॥ १४ ॥

स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्तिनि संसारे मृतः को वा न जायते ॥ १५ ॥

अ०—येन जातेन वंशः समुन्नतिं याति सः जातः; परिवर्तिनि संसारे मृतः को वा न जायते । व्या०—येन=पुरुषेण (पुत्रेण) जातेन = उत्पन्नेन (सता) वंशः = स्वकुलम्, समुन्नतिम् = सम्यग् उन्नतिः समुन्नतिस्ताम् = अभ्युदयं गौरवं च याति = प्राप्नोति, यो हि कुलदीपक इत्यर्थः, सः पुरुषः जातः=सफलजन्मा भवति । परिवर्तिनि=परिवर्तते परिणमते प्रतिक्षणमिति परिवर्ती तस्मिन् परिणामस्वभावे; उत्पादविनाशशालिनीति यावत्, संसारे = भवे, मृतः = निधनं गतः, मृत्वा इति यावत्, को वा व्यक्तिः न जायते = न उत्पद्यते । अर्थात् प्राणिनां मरणोत्तरं कर्मफलभोगार्थम् अवश्यं जन्म ग्रहीतव्यम्, तत्र यः कुलोज्ज्वलकारी, स एव पुरुषः (पुत्रः) इत्यर्थः ॥

भा०—जो पुरुष पैदा होकर अपने कुल की अच्छी उन्नति करता है, उसी का जन्म सफल है, क्योंकि नित्य परिवर्तनशील संसार में कुटुम्ब के भाररूप तो बहुत ही मरते रहते और पैदा होते रहते हैं ॥ १५ ॥

अन्यच्च—गुणिगणगणनाऽऽरम्भे, न पतति कठिनी ससम्भ्रमाद् यस्य ।
तेनाऽऽम्बा यदि सुतिनी, वद वन्ध्या कीदृशी भवति ?॥१६॥

अ०—गुणिगणगणनाऽऽरम्भे ससम्भ्रमात् यस्य कठिनी न पतति, तेन अम्बा यदि सुतिनी (भवति) (तदा) वन्ध्या कीदृशी भवति-वद । व्या०—गुणाः सन्ति येषां ते गुणिनः गुणवन्त इत्यर्थः । गुणिनां गणः=समूहः, तस्य गणना=श्रेष्ठवर्गेऽप्यग्रगण्यबोधिनी संख्या एकत्वादिरूपा तस्या आरम्भः=उपक्रमः तस्मिन् सतीत्यर्थः । गुणवतां संख्यासमये इति भावः । ससंभ्रमात्—संभ्रमेण गौरवेण सहितं ससंभ्रमं

तस्मात्, सगौरवादित्यर्थः, यस्य (पुंसः) पुत्रस्य कठिनी=वर्णविन्याससाधनरूपा खटिका (—भाषायां 'खड़ी' 'चाक' इति प्रसिद्धा) न पतति=एकत्वसंख्यालेखनार्थं न उपयुक्ता भवतीत्यथः। तेन=मुख्यगणनारहितेन पुत्रेण यदि अम्बा=माता, 'अम्बा माताऽथ बाला स्यादि'त्यमरः। सुतिनी=पुत्रवती भवति, तदा=तर्हि बन्ध्या=अजाततनया, कीदृशी=किंविधा भवति? वद=कथय। मूर्खपुत्रशतेऽपि जननी वन्ध्यैवेति भावः। आर्यावृत्तम्।

भा०—जिस पुत्र का नाम गुणवान् श्रेष्ठ पुरुषों की गणना करते समय प्रथम नहीं लिया जाता, उसकी माँ को यदि पुत्रवती कहें तो बताओ वन्ध्या कैसी होती है? ॥ १६ ॥

अपि च—**दाने तपसि शौर्ये च यस्य न प्रथितं मनः।**
विद्यायामर्थलाभे च मातुरुच्चार एव सः॥ १७॥

अ०—दाने तपसि शौर्ये च विद्यायाम् अर्थलाभे च यस्य मनः (यशः इति पाठान्तरम्) न प्रथितं सः मातुः उच्चार एव। व्या०—(यस्य पुरुषस्य मनः इत्यनेन सम्बन्धः) दाने=सत्पात्रेषु धनवितरणे। तपसि=तपस्यायां व्रतनियमादौ। शौर्ये=शूरस्य भावः शौर्यं तस्मिन्=वीरतायामित्यर्थः। विद्यायाम्=ज्ञानार्जने, अर्थलाभे=अर्थस्य=धनस्य, लाभे=अर्जने, यस्य पुरुषस्य मनः=अन्तःकरणम्, न प्रथितं=न सोत्साहतया ख्यातम्। सः पुरुषः (पुत्रः) मातुः=स्वजनन्याः, उच्चारः=पुरीषसमान इत्यर्थः, 'उच्चारावस्करौ शमलं शकृत' इत्यमरः।

भा०—जिस पुरुष (पुत्र) का अन्तःकरण दान देने में, तप करने में, विद्या पढ़ने में तथा धन कमाने में उत्साहित नहीं रहता है, वह पुरुष (पुत्र) माता के त्याग किये हुए मल के समान निरर्थक है॥ १७॥

अपरञ्च—**वरमेको गुणी पुत्रो न च मूर्खशतैरपि।**
एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि॥ १८॥

अ०—एकः गुणी पुत्रः वरम् (अस्ति), मूर्खशतैः अपि न (वरेण मूयते)। एकः चन्द्रः तमः हन्ति, तारागणैः न च (तमः हन्यते)। व्या०—एकः=एकसंख्याकः, गुणी=दानतपोविद्यादिगुणवान्, पुत्रः=तनयः, वरम्=श्रेष्ठः, प्रियो भवतीत्यर्थः। मूर्खशतैः अपि=मूर्खाणां शतानि तैः, मूर्खसहस्रेणापीत्यर्थः, न च वरेण मूयते, सहस्रमूर्खपुत्रा अपि प्रिया न भवन्तीत्यर्थः। तत्र दृष्टान्तो यथो-एकः=एकाकी अपि, चन्द्रः=शशी, तमः=निखिलमन्धकारम्, हन्ति=विनाशयति। तारागणैः तारकाणाम्=नक्षत्राणाम्, गणैः=समूहैरपि (तमः) न च (हन्यते)। अत्र श्लोके 'मूर्खशतान्यपि' इति पाठान्तरम्। 'न च मूर्खशतं वरम्' इत्यपि पाठान्तरम्। 'न च तारागणोऽपि तत्' इत्यपि पाठान्तरम्।

भा०—जैसे एक ही तेजस्वी चन्द्रमा अपने तेज से समग्र अन्धकार को दूर करता है

किन्तु बहुत से भी तेजरहित ताराओं का समूह अन्धेरे का नाश नहीं कर सकता, वैसे ही एक भी तेजस्वी पुत्र अपने सामर्थ्य से धन कमा कर अपने कुटुम्ब का दारिद्र्यरूपी अन्धेरा दूर करता है वही श्रेष्ठ है, परन्तु सैकड़ों मूर्ख पुत्र किसी काम के नहीं॥ १८॥

पुण्यतीर्थे कृतं येन तपः काप्यतिदुष्करम्।
तस्य पुत्रो भवेद् वश्यः समृद्धो धार्मिकः सुधीः॥ १९॥

अ०—येन कापि पुण्यतीर्थे अतिदुष्करं तपः कृतम्, तस्य पुत्रः, वश्यः समृद्धः धार्मिकः सुधीः (च) भवेत्। व्या०—येन=पुरुषेण कापि=कस्मिन्नपि, पुण्यतीर्थे=पुनाति इति पुण्यं=महापातकिनामपि पातकनाशनम्, तरति अनेनेति तीर्थम्=काशीप्रभृति, पुण्यं च तत् तीर्थञ्च पुण्यतीर्थं तस्मिन्, पापप्रध्वंसके त्रिविधतापोद्धारके क्षेत्रे इति भावः। अतिदुष्करम्=अतिदुःखेन क्रियते यत् तत् अतिदुष्करम्=अतिकठिनं, बहुकष्टसाध्यमिति यावत्। तपः=भगवन्नामजपन-मौन-व्रतोपवासयज्ञाद्यनुष्ठानात्मकं कर्म, कृतम्=अनुष्ठितम्, श्रद्धाऽऽदरनैरन्तर्याऽऽसेवितमिति यावत्। तस्य=तपस्विनः पुण्यशालिनः पुरुषस्य, पुत्रः=तनयः, वश्यः—वशम् अर्हतीति वश्यः=सदा पितुराज्ञासेवाऽऽदिपरः, समृद्धः=धनपुत्रकलत्राऽधिकारवैभवादिपरिपूर्णः, धार्मिकः=यज्ञदानादिधर्मानुष्ठानपरः सुधीः=शोभना शास्त्राध्ययनाऽऽसादितविचित्रप्रतिभावती धीः=बुद्धिर्यस्य इति सुधीः=शास्त्र-लोकहृदयेतित्रयाऽनुकूलबुद्धिमानित्यर्थः। भवेत्=स्यात्।

भा०—जिस पुरुष ने पवित्र तीर्थस्थान में बहुत कठिन तप किया हो, उसी पुरुष के घर में पूर्व के पुण्य से अपने पिता की आज्ञा में रहने वाला तथा सेवा करने वाला, धन दौलत से सुखी, धर्म कार्य में प्रेमी और बुद्धिमान् पुत्र उत्पन्न होता है॥ १९॥

तथा चोक्तम्—

अर्थोऽऽगमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकेषु सुखानि राजन्॥२०॥

अ०—हे राजन्! जीवलोकेषु नित्यम् अर्थागमः, अरोगिता च, प्रिया च प्रियवादिनी च भार्या, वश्यः पुत्रश्च, अर्थकरी विद्या च (एतानि) षट् सुखानि (भवन्ति)।

व्या०—हे राजन्! जीवलोकेषु=जीवानां प्राणिनां लोकाः=निवासस्थानानि इति जीवलोकास्तेषु, संसारे इत्यर्थः। नित्यम्=प्रत्यहं सदा, आजीवनमिति यावत्। अर्थागमः—अर्थस्य=धनस्य आगमः=आयः। अरोगिता=निरोगिता, सदा शरीरस्वास्थ्यमिति यावत्। प्रिया-प्रीणाति इति प्रिया=प्रीतिकरी, प्रियवादिनी-प्रियं वदतीति प्रियवादिनी=मधुरभाषिणी चेत्यर्थः, भार्या-भ्रियते असौ सा भार्या=स्त्री च। वश्यः=आज्ञावहः, पुत्रः=सुतश्च। अर्थकरी-अर्थं पुरुषार्थं करोतीति अर्थकरी=धर्मार्थकाममोक्षाख्यपुरुषार्थप्रदेत्यर्थः। विद्या चेति, एतानि षट्प्रकारेण, सुखानि

भवन्तीति । 'जीवलोकस्य' इति पाठान्तरम् । उपजातिः वृत्तम् ।

भा०—इस संसार में छः सुख हैं, जैसे कि—प्रतिदिन पूर्ण धन प्राप्त होना। २—शरीर सदैव निरोग रहना। ३—अतिशय प्रेम करने वाली तथा ४—मीठा बोलने वाली धर्मपत्नी (स्त्री) मिलना ५—आज्ञापालक पुत्र पैदा होना और ६—धर्म-अर्थ-काम-मोक्ष इन चारों पुरुषार्थों को देने वाली विद्या पढ़ना। ये छः न होने से जन्म व्यर्थ कहलाता है ॥ २० ॥

को धन्यो बहुभिः पुत्रैः कुशूलाऽऽपूरणाऽऽढकैः ।
वरमेकः कुलाऽऽलम्बी यत्र विश्रूयते पिता ॥ २१ ॥

अ०—कुशूलाऽऽपूरणाऽऽढकैः बहुभिः पुत्रैः कः धन्यः ? (भवति किन्तु) यत्र पिता विश्रूयते, (तादृशः) कुलालम्बी एकः पुत्रः वरम् । व्या०—कुशूलाऽऽपूरणाढकैः-कुशन्ति पवनादिना स्थानान्तरं गच्छन्तीति कुशूलाः=तुषाः, तैः आ समन्तात् पूरणा इति कुशूलापूरणाः, आढौकन्ते पूरयन्ति-इति आढकाः = अन्नमापकप्रमाणविशेषाः, (पलं निकुञ्चनं मुष्टिः कुडवस्तच्चतुष्टयम् । चत्वारः कुडवाः प्रस्थश्चतुःप्रस्थमाढकम् ॥ द्वावाढकौ भवेद् द्रोणो द्विद्रोणः शूर्प उच्यते । सार्धशूर्पो भवेत् खारी द्वे खार्यौ द्रोण्युदाहृता) कुशूलाऽऽपूरणाश्च ते आढकाश्च तैः कुशूलापूरणाऽऽढकैः = (सदृशार्थे लक्षणा) तुषपूर्णमानपात्रसदृशैरित्यर्थः । बहुभिः अनेकैः, पुत्रैः कः पुरुषः धन्यः = कृतकृत्यो भवति=जायते । न कोऽपीति भावः । किन्तु—यत्र=यस्मिन् पुत्रे सति, पिता = जनकः, विश्रूयते = लोकैः कीर्त्यते, लोकैः प्रशंसितो भवेदिति भावः । तादृशः कुलालम्बी-कुलं वंशम् आलम्बते आश्रयतीति कुलालम्बी = वंशस्य अभ्युदयकरः कुलदीपकरूपः, एकः अपि पुत्रः वरम् (बहुमूर्खपुत्रेभ्यः एकः यशस्वी धीमान् श्रेयानिति भावः) ।

भा०—भूसी से परिपूर्ण पात्र के समान शरीरधारी अनेक मूर्ख पुत्रों से कोई भी पुरुष सुखी, यशस्वी नहीं होता, किन्तु कुल का पोषण तथा अभ्युदय करने वाला बुद्धिमान् एक भी पुत्र—जिससे पिता लोकमान्य होता है—श्रेष्ठ है ॥ २१ ॥

ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी ।
भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः ॥ २२ ॥

अ०—ऋणकर्ता पिता शत्रुः (भवति), व्यभिचारिणी माता च (शत्रुः भवति), रूपवती भार्या च (शत्रुः भवति), अपण्डितः पुत्रः च (शत्रुः भवति)। व्या०—ऋणस्य कर्ता ऋणकर्ता = ऋणग्रहीता, पिता = जनकः, शत्रुः=शत्रुसमानो भवति, तथा व्यभिचारिणी = परपुरुषेण सह (गमनं) व्यभिचारं कुर्वती, माता = जननी च, शत्रुतुल्या भवति, एवं रूपवती-रूपम् अस्ति अस्या इति रूपवती = अतिसौन्दर्यवतीत्यर्थः, भार्या = पत्नी, च शत्रुसदृशी भवति । एवम्—अपण्डितः = अविद्वान् मूर्खः,

एतादृशः पुत्रः अपि शत्रुवद् दुःखदो भवतीति ।

भा०—'जो कष्ट देने वाला हो'—वही 'शत्रु'-कहलाता है । इसलिये ऋण करने वाला पिता ऋण करके कष्ट दे तो वह भी शत्रु ही है और व्यभिचार करनेवाली माता, कुरूप पति को नहीं चाहने वाली रूपवती स्त्री तथा मूर्ख रहकर सदा के लिए दुःख देनेवाला पुत्र भी शत्रुसमान हैं ॥ २२ ॥

यस्य कस्य प्रसूतोऽपि गुणवान् पूज्यते नरः ।
धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति ॥ २३ ॥

अ०—गुणवान् नरः यस्य कस्य प्रसूतः अपि (लोकैः) पूज्यते, वंशविशुद्धः अपि धनुः (यदि) निर्गुणः (तदा) किं करिष्यति ॥ व्या०—गुणवान्-गुणाः सन्ति अस्येति गुणवान्=गुणशाली, नरः=मनुष्यः, यस्य कस्य=श्रेष्ठस्य अधमस्य वा वंशस्य (सम्बन्धे षष्ठी) प्रसूतः=जातः अपि (लोकैः) पूज्यते=सम्मान्यते । तत्र व्यतिरेकदृष्टान्तो यथा-वंशविशुद्धः-वंशो=वेणुः विशुद्धः=सशक्तो यस्य सः=सुदृढवेणुनिष्पन्नोऽपीत्यर्थः, धनुः=चापः, यदि निर्गुणः-निर्गतो गुणो=ज्या यस्य सः निर्गुणः=ज्याहीनः, तदा किं कार्यं = शत्रुहननादिरूपं करिष्यति ? अर्थात् न करिष्यतीति । तथा निर्गुणेन पुत्रेण किं स्यादिति भावः ।

भा०—उत्तम बाँस का बनाया हुआ भी धनुष जब तक रस्सी में नहीं ताना जाता, तब तक किसी भी (शत्रु-मारणादि) कार्य में समर्थ नहीं होता, वैसे ही श्रेष्ठ कुल में उत्पन्न हुआ भी मनुष्य जब तक किसी गुण(कला) को नहीं सीखता तब तक किसी भी काम को सन्तोषपूर्वक सिद्ध नहीं कर सकता है ॥ २३ ॥

हा हा पुत्रक ! नाऽधीतं गतास्वेतासु रात्रिषु ।
तेन त्वं विदुषां मध्ये पङ्के गौरिव सीदसि ॥ २४ ॥

अ०—हा हा पुत्रक ! गतासु एतासु रात्रिषु (त्वया) न अधीतम् , तेन त्वं विदुषां मध्ये पङ्के गौः इव, सीदसि । व्या०—हा हेति खेदे । हे पुत्रक ! पुत्र एवेति पुत्रकः, तत्सम्बुद्धौ हे पुत्रक ! एतासु गतासु = अतीतासु रात्रिषु = निशासु, गतेष्वहर्निशेष्वित्यर्थः । त्वया न अधीतम्=शास्त्रादिकं नाऽभ्यस्तम् , तेन हेतुना त्वं विदुषां = धीमतां मध्ये उपस्थितः सन् , पङ्के = कर्दमे, गौरिव = गोवत् सीदसि, गोवद् अवसन्नो भवसीत्यर्थः ।

भा०—जैसे कि कीचड़ में गई (धँसी) हुई गौ बाहर निकलने की बुद्धि नहीं होने से बाहर नहीं आ सकती, वैसे ही तुम भी विद्वानों की सभा में जाकर विद्या रहित होने से उस सभा को जीतकर श्रेष्ठता को नहीं पा सकोगे, इसलिये विद्या पढ़ना चाहिए ॥ २४ ॥

तत् कथमिदानीमेते मम पुत्रा गुणवन्तः क्रियन्ताम् ? यतः—

व्या०—तत् = तस्माद्धेतोः, इदानीम् = एतर्हि काले, एते मम पुत्राः, कथं = केन